श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये पञ्चषष्टितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये पञ्चषष्टितमं दशकम् ॥

## गोपीसमागमनवर्णनम्

गोपीजनाय कथितं नियमावसाने
    मारोत्सवं त्वमथ साधयितुं प्रवृत्तः।
सान्द्रेण चान्द्रमहसा शिशिरीकृताशे
    प्रापूरयो मुरलिकां यमुनावनान्ते ॥ 65.1 ॥

सम्मूर्छनाभिरुदितस्वरमण्डलाभिः
    सम्मूर्छयन्तमखिलं भुवनान्तरालम्।
त्वद्वेणुनादमुपकर्ण्य विभो तरुण्य -
    स्तत्तादृशं कमपि चित्तविमोहमापुः ॥ 65.2 ॥

ता गेहकृत्यनिरतास्तनयप्रसक्ताः
    कान्तोपसेवनपराश्च सरोरुहाक्ष्यः।
सर्वं विसृज्य मुरलीरवमोहितास्ते
    कान्तारदेशमयि कान्ततनो समेताः ॥ 65.3 ॥

काश्चिन्निजाङ्गपरिभूषणमादधाना
    वेणुप्रणादमुपकर्ण्य कृतार्धभूषाः।
त्वामागता ननु तथैव विभूषिताभ्य -
    स्ता एव संरुरुचिरे तव लोचनाय ॥ 65.4 ॥

हारं नितम्बभुवि काचन धारयन्ती
    काञ्चीं च कण्ठभुवि देव समागता त्वाम्।

हारित्वमात्मजघनस्य मुकुन्द तुभ्यं
व्यक्तं बभाष इव मुग्धमुखी विशेषात्॥ **65.5**॥

काचित् कुचे पुनरसज्जितकञ्चुलीका
व्यामोहतः परवधूभिरलक्ष्यमाणा।
त्वामाययौ निरुपमप्रणयातिभार -
राज्याभिषेकविधये कलशीधरेव॥ **65.6**॥

काश्चित् गृहात् किल निरेतुमपारयन्त्य -
स्त्वामेव देव हृदये सुदृढं विभाव्य।
देहं विधूय परचित्सुखरूपमेकं
त्वामाविशन् परमिमा ननु धन्यधन्याः॥ **65.7**॥

जारात्मना न परमात्मतया स्मरन्त्यो
नार्यो गताः परमहंसगतिं क्षणेन।
तं त्वां प्रकाशपरमात्मतनुं कथञ्चि -
च्चित्ते वहन्नमृतमश्रममश्नुवीय॥ **65.8**॥

अभ्यागताभिरभितो व्रजसुन्दरीभि -
र्मुग्धस्मितार्द्रवदनः करुणावलोकी।
निस्सीमकान्तिजलधिस्त्वमवेक्ष्यमाणो
विश्वैकहृद्य हर मे पवनेश रोगान्॥ **65.9**॥

॥ इति श्रीमन्नारायणीये पञ्चषष्टितमं दशकं समाप्तम्॥